महा॰ वि॰ का नाम

"म॰ वि॰ हं॰ म॰ वि॰ रहीमपुर, खगड़िया।"

दिनाङ्क 9.5.2020

शास्त्री प्रथम ~~वर्ष~~ खण्ड

साहित्य

(अनिवार्य प्रथम खण्ड)

"उपसर्जनं पूर्वम्" → समासे उपसर्जनं प्राक् प्रयोज्यम्। इत्यर्थः प्राक् प्रयोगः। सुपो लुक्। एकदेश विकृतस्यानन्यत्वात् प्रातिपदिक संज्ञायां स्यात् व्युत्पत्तिः। अव्ययीभावश्चेत्यव्ययत्वात् सुपो लुक्। अधिहरि।

"हरौ इति अधिहरि" → "हरि ङि अधि" इत्य- ~~लौकिक विग्रह~~ लौकिकविग्रहे" "अव्ययं विभक्ति-समीप" इत्यव्ययीभाव समासे, प्रथमानिर्दिष्टं समास उपसर्जनम्' इति "अधि" इत्यस्योपसर्जन संज्ञायां "उपसर्जनं पूर्वम्" इत्यनेन पूर्व निपाते, कृत्तद्धितेति प्रातिपदिकत्वे, सुपो धातु इत्यादिना विभक्तेर्लोकि, एकदेश-विकृतन्यायेन प्रातिपदिकनिमित्तकस्यादुत्पत्तौ अव्ययीभावश्चेत्यव्ययत्वात् अव्ययादाप्सुपः "अव्ययादाप्सुपः" इति सुपो लुकि "अधिहरि" — इति।

~~नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः~~

"अव्ययीभावश्च" — अयं नपुंसकं स्यात्।

"नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः —
अदन्तादव्ययीभावात् सुपो न लुक् तस्य
अमादेशश्च स्यात्। गाः पातीति गोपः
तस्मिन्नित्यधिगोपम्।

तृतीयासप्तम्योर्बहुलम् — अदन्तादव्ययी
भावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात्।
अधिगोपम्, अधिगोपेन अधिगोपे
वा। कृष्णस्य समीपम् उपकृष्णम्।
मद्राणां समृद्धिः सुमद्रम्। यवनानां
व्यृद्धिर्दुर्यवनम्। मक्षिकाणामभावो
निर्मक्षिकम्। हिमस्यात्ययोऽतिहिमम्।
निद्रा सम्प्रति न युज्यत ~~इत्य~~
इत्यतिनिद्रम्। हरिशब्दस्य इतिहरि।
~~विष्णु~~ विष्णोः पश्चादनुविष्णु।
योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि
~~यथार्था~~ यथार्थाः। रूपस्य योग्यमनुरूपम्।



~~अस्त~~ अर्थमर्थं प्रति प्रत्यर्थम्।
शक्तिमनतिक्रम्य यथाशक्ति।

दिनेश प्र० सिंह
(एसोसिएट प्रोफेसर)
व्याकरण।